अनुक्रमांक (अंकों में) / Roll No. (in figures) : ____________  अनुक्रमांक (शब्दों में) / Roll No. (in words) : ____________

[कुल प्रश्नों की संख्या : 21] [Total No. of Questions: 21]  [समय : 3.15 घंटे] [Time: 3.15 Hours]
[कुल मुद्रित पृष्ठ : 04] [Total No. of Printed Pages : 04]  [पूर्णांक : 100] [Maximum Marks : 100]

# कक्षा 9वीं वार्षिक परीक्षा, 2025
# Class 9th Annual Examination, 2025
## संस्कृतम् / SANSKRITAM
## [ 906 ]

***सामान्य अनुदेश :***
1) परीक्षार्थी प्रश्न–पत्र के पहले पृष्ठ पर अपना अनुक्रमांक अवश्य लिखें।
2) प्रत्येक प्रश्न के सामने उसका अंक भार अंकित है।

***General Instructions :***
1) Write Roll No. on the first page of the Question Paper.
2) Marks for every question are indicated alongside.

**प्र.1** वस्तुनिष्ठ प्रश्नाः – (12×1=12)

(i) सरसा रसालाः कदा लसन्ति?
(अ) वर्षाकाले (ब) वसन्ते (स) हेमन्तकाले (द) शिशिरकाले

(ii) वृक्षाः स्वयं कानि न खादन्ति?
(अ) फलानि (ब) पत्राणि (स) काष्ठानि (द) वस्त्राणि

(iii) आयतलोचना का अस्ति?
(अ) लता (ब) कमला (स) सीता (द) विमला

(iv) 'स्वर्णकाकः' इति पाठः मूलतः कस्मात् ग्रन्थाद् उद्धृतः?
(अ) रघुवंशात् (ब) रामायणात् (स) विश्वकथाशतकात् (द) पञ्चतन्त्रात्

(v) तपोदत्तः केन विद्यां प्राप्तुं प्रवृत्तोऽस्ति?
(अ) स्वाध्यायया (ब) श्रमया (स) तपश्चर्यया (द) गुरुकुले

(vi) कीदृशः मानवः पर्यावरणं नाशयति?
(अ) स्वार्थान्ध (ब) अन्धः (स) विवेकशून्यः (द) बुद्धिमानः

(vii) मल्लिका सखिभिः सह कुत्र गमिष्यति?
(अ) गंगासागरम् (ब) महाकालमन्दिरम्
(स) काशीविश्वनाथ मन्दिरम् (द) केदारनाथ मन्दिरम्

(viii) 'निर्णायकः' इत्यत्र उपसर्गं शब्दं च पृथक् कृत्वा लिखत –
(अ) निर् + नायकः (ब) निरा + नायकः (स) निण् + आयकः (द) नि + णायकः

(ix) 'आमरणम्' इत्यत्र पदे कः उपसर्गः?
(अ) आम् (ब) अव (स) अप (द) आङ्

(x) ............... कृष्णसर्पः बालसमीपम् आगच्छति।
(अ) एकम् (ब) एकः (स) एकस्य (द) एका

(xi) 'मनोरथः' इति पदस्य संधि विच्छेदं भवति।
(अ) मन + रथः (ब) मनः + रथः (स) मनसि + रथः (द) मनो + रथः

(xii) उद्याने ............... महिलाः भ्रमन्ति।
(अ) त्रयम् (ब) तिस्त्रः (स) त्रीणि (द) त्रयः

**प्र.2** निर्देशानुसारं रिक्तस्थानानि पूरयत – (8×1=8)

(i) ................................ पठनं रोचते। (अस्मद् – शब्दस्य चतुर्थी विभक्ति – एकवचनम्)
(ii) बालकः ................... प्रश्नं पृच्छति। (पितृ – शब्दस्य द्वितीया विभक्ति – एकवचनम्)
(iii) ................................ आज्ञा पालनीया। (गुरु – शब्दस्य षष्ठी विभक्ति – बहुवचनम्)
(iv) ................................ गृहं कुत्र अस्ति? (युष्मद् – शब्दस्य षष्ठी विभक्ति – एकवचनम्)
(v) वयं विद्यालयं ................................। (गम् – लृट्लकार उत्तम पुरुष – बहुवचनम्)
(vi) सः भोजनं ................................। (पच् – लट्लकार प्रथम पुरुष – एकवचनम्)
(vii) विद्यार्थी ज्ञानं ................................। (लभ् – लट्लकारे आत्मनेपदी)
(viii) ................................ अभितः वनं अस्ति। (ग्राम – शब्दस्य द्वितीया विभक्ति – एकवचनम्)



www.mseducationtv.com
Scanned with OKEN Scanner

प्र.3 अधोलिखितम् अपठितगद्यांशं पठित्वा एतदाधारित प्रश्नानां यथानिर्देशम् उत्तराणि लिखत –

संसारे अनेकाः ऋतवः भवन्ति, किन्तु भारतवर्षे षड्ऋतवः प्रमुखाः सन्ति। तासां नामानि वसन्तः, ग्रीष्मः, वर्षा, शरद, हेमन्तः, शिशिरः सन्ति। एतासु ऋतुषु वर्षर्तोः अति महत्वम् अस्ति यतोहि भारतदेशः एकः कृषि प्रधानदेशः अस्ति। भारतवर्षस्य कृषकाः ग्रामेषु एव वसन्ति। ते वर्षायाम् एव निर्भराः भवन्ति। ग्रीष्मतापेन सन्तप्तोऽयं लोकः वर्षासमये सुखानुभवं करोति। कृषकाः बलीवर्दान् संयोज्य क्षेत्रकर्षणामारभन्ते। क्षेत्रेषु एव भूरि शस्यं प्रजायते। सुवृष्ट्या मानवस्य जीवनं निर्विहनं प्रचलति फल–पुष्प–लता–पादपादयः वनस्पतयः प्रसन्नतामभिव्यञ्जयन्ति। सांयसमये गावः वनात् प्रतिनिवृत्य गोष्ठमुपगच्छन्ति। युवतयः वृक्षाशाखानु दोलानन्दम् अनुभवन्ति। ब्रजस्थमन्दिरेषु 'घटाच्छटादर्शनम्' सज्जा प्रारभ्यते। वृन्दावने तु सर्वत्र रासलीलादर्शनं भवति।

प्रश्नाः–

प्रश्न (क) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत। (1)

प्रश्न (ख) एकपदेन उत्तरत – (4X½=2)

(i) भारतवर्षे कति ऋतवः प्रमुखाः सन्ति? (ii) भारतदेशः कीदृशः देशोऽस्ति?

(iii) भारतदेशस्य कृषकाः कुत्र निवसन्ति? (iv) रासलीलायाः दर्शनं कुत्र भवति?

प्रश्न (ग) पूर्णवाक्येन उत्तरत – (3X1=3)

(i) षड्ऋतवः काः सन्ति? (ii) अयं लोकः कदा सुखानुभवं करोति?

(iii) कया मानवस्य जीवनं निर्विघ्नं प्रचलति?

प्रश्न (घ) निर्देशानुसारम् भाषिक कार्यम् कुरुत – (4X1=4)

(i) 'ग्रीष्मः' शब्दस्य विपरीतार्थकः शब्दः अत्र कः?

(ii) "कृषकाः वर्षायामेव निर्भराः भवन्ति" वाक्ये 'कृषकाः' इति संज्ञायाः स्थाने सर्वनामप्रयोगः कर्त्तव्यः।

(iii) "संसारे अनेकाः ऋतवः भवन्ति।" इत्यत्र विशेषणपदं किम्?

(iv) "कृषकाः ग्रामेषु वसन्ति।" अत्र कर्त्ता कः?

प्र.4 अधोलिखितम् अपठितगद्यांशं पठित्वा एतदाधारित प्रश्नानां यथानिर्देशम् उत्तराणि लिखत –

सर्वेषु धनेषु विद्याधनम् एव उत्तमं धनं मन्यते। विद्यया एव जनाः जानन्ति यत् किं कर्त्तव्यम् अस्ति, किं च अकर्त्तव्यम्। अनया एव ज्ञायते यत् किम् उचितम् अस्ति किं च अनुचितम्? विद्याधनेन एव वयं जानीमः यत् कः सन्मार्गः अस्ति कः च कुमार्गः? विद्यया एव मनुष्यः संसारे सम्मानं प्राप्नोति। विद्याधनाय पौनः पुन्येन नमः।

प्रश्नाः–

प्रश्न (क) एकपदेन उत्तरत – (2X½=1)

(i) किं धनम् उत्तमं मन्यते? (ii) कया मनुष्यः सम्मानं प्राप्नोति?

प्रश्न (ख) पूर्णवाक्येन उत्तरत – (2X1=2)

(i) विद्यया किं ज्ञायते? (ii) केषाय पौनः पुन्येन नमः?

प्रश्न (ग) भाषिक कार्यम् – (2X1=2)

(i) 'अपमानम्' इत्यस्य पदस्य विलोमपदं लिखत।

(ii) 'जानीमः' क्रियापदस्य कर्तृपदं चित्वा लिखत।

प्र.5 अधोलिखितपदानां सन्धिं/सन्धिविच्छेदं कृत्वा सन्धेः नामापि लिखत – (3X1=3)

(क) शिवास्ते (ख) पुरुष + उपार्जिता (ग) सप्ताहान्ते

प्र.6 अधोलिखितपदानां समासविग्रहं कृत्वा समासस्य नामापि लिखत – (3X1=3)

(क) त्रिलोकी (ख) धर्माधिकारी (ग) पीताम्बरः

प्र.7 अधोलिखितपदानां प्रकृति–प्रत्ययं विभज्य लिखत – (3X1=3)

(क) पठितम् (ख) गच्छन् (ग) गुरुतमः

प्र.8 रेखांकितपदेषु विभक्तिं तत्कारणञ्च लिखत – (3X1=3)

(क) <u>वृक्षस्य</u> उपरि खगाः सन्ति। (ख) <u>राजमार्गम्</u> अभितः वृक्षाः सन्ति। (ग) अलं <u>विवादेन</u>।

प्र.9 अधोलिखितस्य श्लोकस्य हिन्दी भाषायां सप्रसङ्गं भावार्थं लिखत – (3)

वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः।।

प्र.10 रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरुत – (4X1=4)

(क) <u>सूर्योदयात्</u> पूर्वमेव बालिका तत्रोपस्थिता। (ख) कल्पतरुः <u>पृथिव्यां</u> धनानि अवर्षत्।

(ग) <u>खलानां</u> मैत्री आरम्भगुर्वी भवति। (घ) तपोदत्तः <u>विद्याध्ययनाय</u> गुरुकुलम् अगच्छत्।

प्र.11 अधोलिखितस्य श्लोकस्य अन्वयं मञ्जूषात् पदानि चित्वा पूरयत – (2)

यत्रदेशेऽथवा स्थाने भोगा भुक्ताः स्ववीर्यतः।
तस्मिन् विभवहीनो यो वसेत् स पुरुषाधमः।।

अन्वयः–यत्र देशे अथवा (i) ............... स्ववीर्यतः (ii) ............... भुक्ता, तस्मिन यः विभवहीनः वसेत् (iii) ........... पुरुषाधमः।

| मञ्जूषा – सः, स्थाने, भोगाः |
|---|



www.mseducationtv.com

Scanned with OKEN Scanner

प्र.12 स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखत यद् अस्मिन् प्रश्नपत्रे न स्यात्। (3)

प्र.13 "भान्तो बालः" इति पाठसारं हिन्दीभाषायां लिखत। (4)

**अथवा**

"स्वर्णकाकः" इति पाठसारं हिन्दीभाषायां लिखत।

प्र.14 अधोलिखितपदानां हिन्द्याम् अर्थ लिखत – ($4 \times 1/2 = 2$)

(क) मृदुम् (ख) दुहिता (ग) गवाक्षात् (घ) भ्रान्तः

प्र.15 अधोलिखितं गद्यांशं पठित्वा एतदाधारित प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत –

जीर्णधनः अवदत् – "भोः श्रेष्ठिन्! नास्ति दोषस्ते, यदि मूषकैः भक्षिता। ईदृशः एव अयं संसारः। न किञ्चिदत्र शाश्वत–मस्ति। परमहं नद्यां स्नानार्थं गमिष्यामि। तत् त्वम् आत्मीयं एनं शिशुं धनदेवनामानं मया सह स्नानोपकरणहस्तं प्रेषय" इति। स श्रेष्ठी स्वपुत्रम् अवदत् – "वत्स! पितृव्योऽयं तव, स्नानार्थं यास्यति, तद् अनेन साकं गच्छ" इति। अथासौ श्रेष्ठिपुत्रः धनदेवः स्नानोपकरणमादाय प्रहृष्टमनाः तेन अभ्यागतेन सह प्रस्थितः।

प्रश्नाः–

प्रश्न (क) एकपदेन उत्तरत – ($2 \times 1/2 = 1$)

(i) 'नास्ति दोषस्ते' – इति कः आह? (ii) संसारे किञ्चिद् किं नास्ति?

प्रश्न (ख) पूर्णवाक्येन उत्तरत – ($2 \times 1 = 2$)

(i) जीर्णधनः स्नानार्थं कुत्र गमिष्यति? (ii) श्रेष्ठिनः पुत्रस्य किन्नाम् आसीत्?

प्रश्न (ग) भाषिक कार्यम् – ($2 \times 1 = 2$)

(i) "गमिष्यामि" इति क्रियापदस्य कर्तृपदं किम्?

(ii) "खादिता" इति पदस्य पर्यायपदं गद्यांशात् चिनुत।

**अथवा**

नैतादृशः स्वर्णपक्षो रजतचञ्चुः स्वर्णकाकस्तया पूर्वं दृष्टः। तं तण्डुलान् खादन्तं हसन्तञ्च विलोक्य बालिका रोदितुमारब्धा। तं निवारयन्ती सा प्रार्थयत् – "तण्डुलान् मा भक्षय। मदीया माता अतीव निर्धना वर्तते।" स्वर्णपक्षः काकः प्रोवाच, "मा शुचः। सूर्योदयात्प्राग् ग्रामादबहिः पिप्पलवृक्षमनु त्वया आगन्तव्यम्। अहं तुभ्यं तण्डुलमूल्यं दास्यामि।" प्रहर्षिता बालिका निद्रामपि न लेभे। https://www.rajasthanboard.com

प्रश्नाः–

प्रश्न (क) एकपदेन उत्तरत –

(i) का रोदितुम् आरब्धा? (ii) "तण्डुलान् मा भक्षय" इति कोऽवदत्?

प्रश्न (ख) पूर्णवाक्येन उत्तरत –

(i) बालिकया कीदृशः काकः पूर्वं न दृष्टः? (ii) सूर्योदयात्प्राग् बालिकया कुत्र गन्तव्यम्?

प्रश्न (ग) भाषिक कार्यम् –

(i) 'दास्यामि' इति क्रियापदस्य कर्तृपदं किम्? (ii) "शोकः" इत्यस्य पर्यायपदं चित्वा लिखत।

प्र.16 अधोलिखितं पद्यांशं पठित्वा एतदाधारितप्रश्नाम् उत्तराणि यथानिर्देशं लिखत –

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्माद् तदेव वक्तव्यं वचने का दरिद्रता।।

प्रश्नाः–

प्रश्न (क) एकपदेन उत्तरत – ($2 \times 1/2 = 1$)

(i) जन्तवः केन तुष्यन्ति? (ii) अतः किं वक्तव्यम्?

प्रश्न (ख) पूर्णवाक्येन उत्तरत – ($2 \times 1 = 2$)

(i) सर्वे जन्तवः केन तुष्यन्ति? (ii) प्रियवाक्यस्य का विशेषता?

प्रश्न (ग) भाषिक कार्यम् – ($2 \times 1 = 2$)

(i) 'जन्तवः' इति कर्तृपदस्य क्रियापदं किम्? (ii) 'सर्वे' इत्यस्य विशेष्यपदं किम्?

**अथवा**

सा तदा करुणा वाचो विलपन्ती सुदुःखिता।
वनस्पतिगतं गृध्रं ददर्शायतलोचना।।

प्रश्नाः–

प्रश्न (क) एकपदेन उत्तरत –

(i) सीता किं कुर्वन्ती गृध्रम् अपश्यत्? (ii) गृध्रः कुत्र स्थितः आसीत्?

प्रश्न (ख) पूर्णवाक्येन उत्तरत –

(i) सीता कुत्र स्थितं गृध्रं अपश्यत्? (ii) सीता कीदृशी आसीत्?

प्रश्न (ग) यथानिर्देशम् उत्तरत –

(i) 'वृक्ष' शब्दस्य स्थाने श्लोके किं पदं प्रयुक्तम्?

(ii) श्लोकेऽस्मिन् 'सा' इति सर्वनामपदं स्थाने संज्ञापदं किम्?



www.mseducationtv.com

Scanned with OKEN Scanner

प्र.17 स्वं गोविन्दं मत्वा राजकीय – उच्च – माध्यमिक – विद्यालय जोधपुरस्य प्रधानाचार्याय अस्वस्थताकारणात् पञ्चदिवसस्य अवकाशार्थं संस्कृते प्रार्थनापत्रं लिखत। (5)

अथवा

अधोलिखितं पत्रं मञ्जूषासहायतया रिक्त स्थानानि पूरयित्वा लिखत –

| मञ्जूषा – अनुज, पित्रोः, तव, प्राप्ताः, ह्य, गणितविषये त्वं, आशीषः, छात्रावासातः, शोभनः |
|---|

जोधपुरतः

.................................

दिनाङ्कः .................................

प्रिय ....................... महेश!

सस्नेहम् ....................... ।

....................... अहं तव पत्रं प्राप्तवान्। परीक्षा – परिणामः ....................... अस्ति, परं ....................... भवता न्यूनाः अङ्काः ....................... इति सखेदं मया अधीतम्। ....................... प्रतिदिनं प्रातःकाले उत्थाय गणितस्य अभ्यासं कुरु, गणिताध्यापकं च पुनः पुनः प्रश्नान् पृच्छ। अभ्यासेन एव सर्वाणि कार्याणि सिद्धयन्ति। ....................... चरणयोः सादरं प्रमाणाः।

भवदीयः अग्रजः

रमेशः

प्र.18 मञ्जूषातः उपयुक्तपदानि गृहीत्वा पितापुत्रयोः मध्ये योगदिवस विषये वार्तालापं पूरयतु – (5)

| कुर्वन्ति, आगच्छ, जूनमासस्य, कार्यक्रमाः, शक्नोमि, अस्माकम्, योगदिवसे, अन्तर्राष्ट्रिययोगदिवसः |
|---|

पुत्रः – भोः पितः! .......................21 दिनाङ्के कः दिवसः भवति?

पिता – अरे! तस्मिन् दिने तु .......................................भवति।

पुत्रः – योगदिवसे के .......................................भवन्ति?

पिता – .......................विश्वेजनाः प्राणायामं व्यायामं च कुर्वन्ति।

पुत्रः – योगेन.......................................स्वास्थ्यं सम्यक् भवति वा?

पिता – आम्। ये योगं .......................ते रुग्णाः न भवन्ति।

पुत्रः – तर्हि अहम् अपि योगं कर्तुं .......................................वा?

पिता – किमर्थं न, .......................................आवां योगं करवाव।

अथवा

अधोलिखितम् अनुच्छेदं मञ्जूषायाः सहायतया पूरयित्वा उत्तरपुस्तिकायां लिखत –

| सदाचारः, सर्वेषाम्, लोके, भूषणम्, कुर्वन्ति, समावेश, जने, अतः |
|---|

अस्मिन् (i) ................ सज्जनाः यथा आचरणम् (ii) ................ तद्वदेव आचरणम् (iii) ................। सदाचारे (iv) ................ गुणानाम् (v) ................भवति। सुजनता, वाक्संयमः विनयः, धर्माचरणमिति, सद्गुणाः सदाचारशीले (vi) ................प्रामुख्येन दृश्यन्ते। (vii) ................ सदाचारः शीलं वा मानवस्यपरम् (viii) ......................मन्यते।

प्र.19 चित्रम् आधृत्य अधः प्रदत्त शब्द–सूच्याः / मञ्जूषायाः सहायतया उत्तरपुस्तिकायां पञ्चवाक्यानि लिखत – (5)

| मञ्जूषा – वर्षाकाले, वृक्षैः, भवति, शुद्धं, अस्माकं वृक्षारोपणं, पर्यावरणं, मित्राणि, कर्तव्यम्, रक्षणम् |
|---|



प्र.20 अधोलिखितानि वाक्यानि क्रमरहितानि सन्ति। यथाक्रमं संयोजनं कृत्वा लिखत। (4)

(i) घटे जलम् अल्पम् आसीत्। (ii) तस्य मस्तिष्के एकः विचारः समागतः।

(iii) एक पिपासितः काकः आसीत्। (iv) सः पाषाणखण्डानि घटे अक्षिपत्, जलं च उपरि आगतम्।

(v) सः वने एकं घटम् अपश्यत्। (vi) जलं पीत्वा काकः ततः अगच्छत्।

प्र.21 अधोलिखितेषु वाक्येषु केषांञ्चित् षड्वाक्यानां संस्कृत भाषया अनुवादं कुरुत। (6)

(i) राम पुस्तक पढ़ता है। (ii) नगर के पास उपवन है। (iii) हिमालय से गङ्गा निकलती है।

(iv) हम सब नाटक देखते हैं। (v) मैं कल जयपुर जाऊँगा। (vi) दस बज गए हैं।

(vii) तुम भी जाओ। (viii) सीता पुष्प सूँघती है।

---------------------------------



www.mseducationtv.com Scanned with OKEN Scanner